श्री मंगळचंडिका स्तोत्रं

श्री मंगळचंडिका स्तोत्रं

ध्यानं |
देवीं षोडशवर्षीयां रम्यां सुस्थिरयौवनां |
सर्वरूपगुणाढ्यां च कोमलांगीं मनोहरां || 1 ||

श्वेतचंपकवर्णाभां चंद्रकोटिसमप्रभां |
वह्निशुद्धांशुकाधानां रत्नभूषणभूषितां || 2 ||

बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितं |
बिंबोष्ठीं सुदतीं शुद्धां शरत्पद्मनिभाननां || 3 ||

ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनां |
जगद्धात्रीं च दात्रीं च सर्वेभ्यः सर्वसंपदां || 4 ||

संसारसागरे घोरे पोतरुपां वरां भजे || 5 ||

देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने |
प्रयतः संकटग्रस्तो येन तुष्टाव शंकरः || 6 ||

शंकर उवाच |
रक्ष रक्ष जगन्मातर्देवि मंगळचंडिके |
संहर्त्रि विपदां राशेर्हर्षमंगळकारिके || 7 ||

हर्षमंगळदक्षे च हर्षमंगळचंडिके |
शुभे मंगळदक्षे च शुभमंगळचंडिके || 8 ||

मंगळे मंगळार्हे च सर्वमंगळमंगळे |
सतां मंगळदे देवि सर्वेषां मंगळालये || 9 ||

पूज्या मंगळवारे च मंगळाभीष्टदैवते |
पूज्ये मंगळभूपस्य मनुवंशस्य संततं || 10 ||

मंगळाधिष्ठातृदेवि मंगळानां च मंगळे |
संसारमंगळाधारे मोक्षमंगळदायिनि || 11 ||

सारे च मंगळाधारे पारे त्वं सर्वकर्मणां |
प्रतिमंगळवारे च पूज्ये त्वं मंगळप्रदे || 12 ||

स्तोत्रेणानेन शंभुश्च स्तुत्वा मंगळचंडिकां |
प्रतिमंगळवारे च पूजां कृत्वा गतः शिवः || 13 ||

देव्याश्च मंगळस्तोत्रं यः शृणोति समाहितः |
तन्मंगळं भवेच्छश्वन्न भवेत्तदमंगळं || 14 ||

प्रथमे पूजिता देवी शंभुना सर्वमंगळा |
द्वितीये पूजिता देवी मंगळेन ग्रहेण च || 15 ||

तृतीये पूजिता भद्रा मंगळेन नृपेण च |
चतुर्थे मंगळे वारे सुंदरीभिश्च पूजिता |
पंचमे मंगळाकांक्षैर्नरैर्मंगळचंडिका || 16 ||

पूजिता प्रतिविश्वेषु विश्वेशैः पूजिता सदा |
ततः सर्वत्र संपूज्य सा बभूव सुरेश्वरी || 17 ||

देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने |
देव्याश्च मंगळस्तोत्रं यः शृणोति समाहितः || 18 ||

तन्मंगळं भवेच्छश्वन्न भवेत्तदमंगळं |
वर्धंते तत्पुत्रपौत्रा मंगळं च दिने दिने || 19 ||

इति श्रीब्रह्मवैवर्ते महापुराणे प्रकृतिखंडे नारदनारायणसंवादे चतुश्चत्वारिंशोऽध्याये मंगळ चंडिका स्तोत्रं |